# द्वितीयस्कंध परिच्छेदः

## 4 – अथ चतुर्थ दशकम्

## ॥ अष्ठांगयोग, योगसिद्धि वर्णनम् ॥

कल्यतां मम कुरुष्व तावतीं कल्यते भवदुपासनं यया ।
स्पष्टमष्टविधयोगचर्यया पुष्टयाऽऽशु तव तुष्टिमाप्नुयाम् ॥ (4.1)

ब्रह्मचर्यदृढतादिभिर्यमैः आप्लवादिनियमैश्च पाविताः ।
कुर्महे दृढममी सुखासनं पंकजाद्यमपि वा भवत्पराः ॥ (4.2)

तारमन्तरनुचिन्त्य सन्ततं प्राणवायुमभियम्य निर्मलाः ।
इन्द्रियाणि विषयादथापहृत्यास्महे भवदुपासनोन्मुखाः ॥ (4.3)

अस्फुटे वपुषि ते प्रयत्नतो धारयेम धिषणां मुहुर्मुहुः ।
तेन भक्तिरसमन्तरार्द्रतामुद्वहेम भवदंघ्रिचिन्तकाः ॥ (4.4)

विस्फुटावयवभेदसुन्दरं त्वद्वपुस्सुचिरशीलनावशात् ।
अश्रमं मनसि चिन्तयामहे ध्यानयोगनिरतास्त्वदाश्रयाः ॥ (4.5)

ध्यायतां सकलमूर्तिमीदृशीं उन्मिषन्मधुरताहृतात्मनाम् ।
सान्द्रमोदरसरूपमान्तरं ब्रह्मरूपमयि! तेऽवभासते ॥ (4.6)

तत्समास्वदनरूपिणीं स्थितिं त्वत्समाधिमयि विश्वनायक! ।
आश्रिताः पुनरतः परिच्युता वारभेमहि च धारणाधिकम् ॥ (4.7)

इत्थमभ्यसन निर्भरोल्लसत् त्वत्परात्म सुखकल्पितोत्सवाः ।
मुक्तभक्तकुलमौलितां गताः संचरेम शुकनारदादिवत् ॥ (4.8)

त्वत्समाधिविजये तु यः पुनर्मङ्क्षु मोक्षरसिकः क्रमेण वा ।
योगवश्यमनिलं षडाश्रयैः उन्नयत्यज! सुषुम्नया शनैः ॥ (4.9)

लिंगदेहमपि सन्त्यजन्नथो लीयते त्वयि परे निराग्रहः ।
ऊर्ध्वलोककुतुकी तु मूर्धतः सार्धमेव करणैर्निरीयते ॥ (4.10)

अग्निवासर वलर्क्ष पक्षगैः उत्तरायणजुषा च दैवतैः ।
प्रापितो रविपदं भवत्परो मोदवान् ध्रुवपदान्तमीयते ॥ (4.11)

आस्थितोऽथ महरालये यदा शेषवक्त्रदहनोष्मणार्द्यते ।
ईयते भवदुपाश्रयस्तदा वेधसः पदमतः पुरैव वा ॥ (4.12)

तत्र वा तव पदेऽथवा वसन् प्राकृतप्रलय एति मुक्तताम् ।
स्वेच्छया खलु पुराऽविमुच्यते संविभिद्य जगदण्डमोजसा ॥ (4.13)

तस्य च क्षितिपयोमहोऽनिलद्यो-महत्प्रकृतिसप्तकावृती ।
तत्तदात्मकतया विशन् सुखी याति ते पदमनावृतं विभो! ॥ (4.14)

अर्चिरादिगतिमीदृशीं व्रजन् विच्युतिं न भजते जगत्पते! ।
सच्चिदात्मक! भवद्गुणोदयानुच्चरन्तमनिलेश! पाहि माम् ॥ (4.15)

॥ इति अष्ठांगयोग, योगसिद्धि वर्णनम् चतुर्थ दशकम् संपूर्णम् ॥